Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 3 | ISSN : 2581- 6306

# शैवागमेषु दीक्षाविधिस्वरूपसंक्षेपः

डॉ. पि. नीलकण्ठम्
सहायाचार्यः,शैवागम विभागः, श्रीवेङ्कटेश्वर वेद विश्वविद्यालयः, तिरुपति, आन्ध्रप्रदेशः

**Article Info**
Volume 5, Issue 3
Page Number : 194-203

**Publication Issue :**
May-June-2022

**Article History**
Accepted : 01 May 2022
Published : 30 May 2022

**उपोद्घातः** - सद्योजात-वामदेव-अघोर-तत्पुरुष-ईशाननामकेभ्यः महेश्वरस्य पञ्चमुखेभ्यः उद्धृताः शैवागमाः पादार्थत्रययुक्ताः पादचतुष्टययुताश्च विराजन्ते । जीविनां उद्धिधीर्षया परमात्मना अनुगृहीताः एते आगमाः आलय स्थापन मार्गेण बिम्बाराधन युक्तं अर्चना मार्गम् उपदिशन्ति। एवं विध आराधनस्य योग्यता सिद्धये आत्मोद्धरणाय करणीयान् संस्कारान् दीक्षासंस्काराः निरूपयन्ति ।

**कुञ्चिकापदानि-** दिव्यतां, दिव्यज्ञानम्, पापञ्जरभुञ्जानि, निराधारः, प्रासादमन्त्रम्, समयदीक्षा, अधिकारी, सामीप्यं, निर्वाणदीक्षा, शिवज्ञानम्, साधिकारदीक्षा, भौतिकी, सद्योनिर्वणदीक्षा, चाक्षुषाक्रियमाण, चक्राणिदर्शयिन्वा, विशेषाधिकारप्रप्तये, राजलाञ्छनानि, दमनोत्सवः, नवनाभमण्डलम्, पर्यग्निकरण, वर्धनीकलशपूजा, अध्वरपतिंशिवं, नाडीसन्धानं, सम्पातहोमः, बिन्दुरूपंजीवं, वागीशौ, शन्त्यतीतकलासन्धानम्, विष्णुकारणेश्वरिकां, चुलुकोदकेन, वलयत्ररूपेण, मायापाशमोचनर्थं, शुद्धजीवं, अनादिबोधाभव, सुषुम्णामार्गेण, संहितामन्त्रान्, अस्त्रभिषेकेण, आत्मार्थपूजां, कलापञ्चकेभ्यः, कम्पनानन्दादयः, सायुज्यं ।

**विशयः** - अष्टाविंशति शैवागमेषु केषुचित्, दीक्षा विधिपटलमिति नाम्ना एते संस्काराः प्रत्येकाध्याये निरूपिताः। तेषां सारभूतो अंशः अत्र उदाह्रियते ।

1. दीक्षा शब्दार्थः – दीक्षा शब्द निरुक्तिः
2. दीक्षा भेदाः
3. दीक्षा प्रदानाय शिष्ययोग्यता परीक्षणम्
4. दीक्षा कालनिर्णयः
5. दीक्षा स्थानम्
6. दीक्षा मण्डप लक्षणम्
7. दीक्षा संस्कारेषु क्रियाविशेषाः
8. दीक्षया प्राप्यं फलम्

इति विशेषाः आगमेषु विस्तरेण निरूपिताः तत्स्वरूपं अत्र निरूप्यते ।

**1. दीक्षाशब्दार्थः दीक्षा शब्द निरुक्तिः** - सर्वे शब्दाः धातुभ्यः एव निष्पन्नाः इति वैयाकरणाः नैरुक्ताश्च अभिप्रयन्ति। दीक्षामौण्डेज्योपनयन नियमव्रतादेशेषु (भ्वादि - आत्मनेपदि - सेट (609) इति धातोः नन्दिग्रहिपचादिभ्यो ल्पुणिन्यचः (3-1-134) इति सूत्रेण पचादि गणपाठात् अच् प्रत्यये स्त्रियां अजाद्यतष्टाप् (4-1-4) इति टाप् प्रत्यये दीक्षा इति रूपम् । मुण्डनं = वपनम् तत्कर्म मौण्डमम्। इज्या यज धातोः निष्पन्नं रूपम् । देवपूजा सङ्गतिकरण दानादयः तस्यार्थाः । उपनयनं वेदाध्ययनानाधिकार सिद्धये करणीयः संस्कारः नियमव्रतशब्दौ तुल्यार्थकावपि ब्रह्मचर्यादयो नियमाः गोदानादयः व्रताः । आदेशः गुरोः अज्ञानुवर्तित्वम् एते सर्वे अर्थाः दीक्षा पदार्थाः भवन्ति ।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

नैरुक्तास्तु डुदाञ् दाने क्षि–क्षये इति धातु द्वयात् दीक्षा शब्दं निष्पादयन्ति । धातूनामनेकार्थत्वात् धात्वर्थमपि अन्यथा व्यचिख्यासन्ति ।

**वर्णागमो वर्णविपर्ययश्च द्वौचापरौ वर्ण विकारनाशौ ।**

**धातोस्तदर्थातिशयेन योगः तदुच्यते पञ्चविधं निरुक्तम्**[1] ॥**(1.निरुक्तम्-नैघण्टुककाण्डे-पुट संख्या153)**

आदेश शब्दस्य गुरोः इष्टदेवता मन्त्रप्राप्तिः इत्यपि अर्थः आगमेषु व्याख्यातः । आगमेषु दीक्षा शब्दस्य निरुक्तिः बहुधा दृष्टा । तन्निरूपकाश्च श्लोकाः केचित् ।

**अत्र उदाह्रियन्ते -**

**ददाति दिव्यतां तावत् क्षिणुयात् पापसन्ततिः ।**

**तेन दीक्षेति व्याख्याता मुनिभिस्तन्त्रपारगैः**[2]**॥ (2.सोमशम्भुपद्धतिः)**

अपि च ईषदर्थभेद दर्शनेपि शैवागमेषु दीक्षा शिवसालोक्य सारूप्य प्रापिका चेति व्याख्याता ।

**दीयते यत् शिवत्वं हि क्षीयते पाप पञ्जरात् ।.....**

**ज्ञानं च जायते शिष्ये सा दीक्षेत्यभिधीयते ॥**

एभिः श्लोकैः स्पष्टीभवति शिवतत्त्वप्रदायिनी, पापपञ्जरभञ्जनी, सद्ज्ञानप्रदायिनी मलत्रयापनोदिनी, मलादि पाश छेदिनी, ज्ञानजननी दीक्षा इति । शिष्ये शिवत्वसिद्धये आत्मसंस्कारार्थं दीक्षा संस्कारः मुख्यो भवति दीक्षायाः प्रदाता गुरुः दीक्षायाः स्वीकर्ता शिष्यो भवति । गुरुः शिष्य योग्यतां परीक्ष्यैव तं दीक्षितं करोति ।

**2.दीक्षा भेदाः -** 1.समयदीक्षा 2.विशेषदीक्षा 3.निर्वाणदीक्षा इति दीक्षा त्रिधा भवति । दीक्षा प्रदानमपि साधारं निराधारं इति द्विधा भवति ।

**निराधारोऽथ साधारः**[3] **शिवस्यानुग्रहो द्विधा ।**

**निराधारोद्वयोस्तेषां साधारः सकलस्य तु ॥ (1.रौरव आगमः - 10/16 श्लोकः)**

a.**निराधारा -** आचार्यपेक्षां विना सदाशिवानुग्रहेण साक्षात् शिवेनैव अनुगृहीता दीक्षा निराधारा ।

**आचार्य निरपेक्षेण क्रियते शम्भुनैव या ।**

**तीव्रशक्ति निपातेन निराधारेति सा स्मृता**[4] **॥ (4.रौरव आगमः – 10/17 श्लोकः)**

b.**साधारा -** आधेरण सहिता साधारा । सदाशिवः गुरुं साधनीकृत्य आचार्यमुखात् दीक्षां भक्ताय ददाति अतः साधारा भवति ।

**आचार्य मूर्तिमास्थाय मन्दतीव्रादि भेदतः ।**

**शक्त्या याः कुरुते शम्भोः सा साधिकारणोच्यते**[5] **॥ (5. रौरव आगमः – 10/18 श्लोकः)**

**साधारा दीक्षा -** समयदीक्षा विशेषदीक्षा, निर्वाणदीक्षा इति त्रिधा भवति ।

**2.1.समयदीक्षा -** गुरुः शिष्यस्य मलपरिपाकादि विषयान् सम्यक् परिशील्य चक्षुषा अनुगृह्य दीक्षा नाम दत्वा अष्टकला प्रसाद मन्त्रोपदेशेन शैवागम ग्रन्थ पठनयोग्यतां कल्पयति । इमां दीक्षां गुरोः प्राप्य नियमान् अनुष्ठाय शिष्यः अन्ते सालोक्य नामकं मोक्षं प्राप्नोति ।

**2.2.विशेषदीक्षा -** गुरुः शिष्याय प्राक् दत्तायाः समयदीक्षायाः नियमाः शिष्येण यथानुष्ठिताः इति परीक्ष्य शिष्ये इतोऽधिका शिवज्ञानजिज्ञासा वर्तते इति निश्चित्य शिष्यस्य वयः दृष्ट्वा तं योग्यं निश्चित्य शैवान् चक्क नामकरणादि संस्कारान् कृत्वा

विशेषदीक्षां ददादि । अनया दीक्षया शिष्य: स्वार्थ परार्थ नित्यार्चने पूजानिर्वहणे च अधिकारी भवति । रातस्या: दीक्षाया: नियमान अनुसृत्य अन्ते सामीप्यं मोक्षं प्राप्नोति ।

**2.3.निर्वाणदीक्षा** - निर्वाण शब्द: मोक्षार्थक: निर्वाणोऽवाते (8-2-50) इति सूत्रेण निपातित: । सर्वात्मना मोक्ष प्रदायिनी दीक्षा निर्वाणदीक्षा । समयविशेषदीक्षयो: समाप्ते: अनन्तरं अपि शिवज्ञाने जिज्ञासुं शिष्यं निश्चित्य गुरुणा इयं दीक्षा शिष्याय देया । एषा दीक्षा पूर्वद्वयात् विस्तृततरा । दीक्षा त्रयप्रदान पद्धतिरपि चतुर्विधा भवति।

A.सबीजदीक्षा B.निर्बीजदीक्षा C.साधिकारदीक्षा D.निरधिकारदीक्षा

A. **सबीजदीक्षा** - इयं दीक्षा वैदिकधर्मेषु क्रियासु च अधिकार प्रदायिनी । एषा 1.शिवधर्मिणी 2.लोकधर्मिणी इति द्विविधा ।

**1. शिवधर्मिणी**- मुमुक्षुभ्य: देया दीक्षा शिवधर्मिणी । एषा पुन: भौतिकी, नैष्ठिकी चेति द्विविधा। तयो:

**भौतिकीदीक्षा** - गृहस्थादि आश्रमधर्मेषु स्थितेभ्य: प्रदेया दीक्षा । नैष्ठिकी दीक्षा नैष्ठिक: नाम ब्रह्मचारी । ब्रह्मचारिभ्य: देया दीक्षा नैष्ठिकदीक्षा ।

**2. लोकधर्मिणी दीक्षा** - लौकिकान् भोगान् इच्छद्भ्य: देया दीक्षा ।

B.**निर्बीजदीक्षा** - वैदिकधर्माचरणे ये अशक्ता: येषां च तेष्वधिकार: नास्ति तेभ्य: प्रदेया दीक्षा । अर्थात् स्त्रीभ्य: वृद्धेभ्य: नियमाचरण अनभिज्ञेभ्य: देया दीक्षा । एषा पुन: द्विविधा । 1.सद्योनिर्वाणदीक्षा 2.असद्योनिर्वाणदीक्षा च ।

**1.सद्योनिर्वाणदीक्षा** - सद्योनिर्वाणदीक्षायां गुरु: तीव्रया दृशा शिष्यस्य पूर्वजन्म कृतान् पापपुण्णादीन् ध्वस्तान् कृत्वा सपदि तं मोक्षप्रात्पौ अधिकारिणं कर्तुं देया दीक्षा ।

**2.असद्योनिर्वाणदीक्षा** - शिष्यस्य पापपुण्यौ शोधयित्वा पापापनोदनेन पुण्यकर्मफल भोगानन्तरं शिवसायुज्यप्राप्तये देया दीक्षा ।

C.**साधिकारदीक्षा** - गुरु: शिष्यं आत्मन: अभिन्नं भावयित्वा तस्मै दीक्षा संस्कारान् दत्वा शिष्यमपि परेभ्य: दीक्षा प्रदाने अनया दीक्षया अधिकारिणं करोति । एषा पुन: द्विविधा - 1. ज्ञानवती दीक्षा 2. क्रियावती दीक्षा इति ।

D.**निरधिकारदीक्षा** - अनया दीक्षया गुरु: शिष्यं आत्मार्थपूजायां जपकरणे च अधिकारिणं करोति । अनया दीक्षया शिष्य: परेभ्य: दीक्षां दातुं अधिकारी न भवति । एषापि दीक्षा 1.ज्ञानवतीदीक्षा 2.क्रियावतीदीक्षा इति द्विविधा भवति । भेदद्वये पूर्वोक्त द्वयेऽपि ।

**1.ज्ञानवतीदीक्षा** - समस्तशास्त्रज्ञान युक्ताय शिष्याय गुरु: भौतिक कुण्डमण्डपादि विशेषान् विनैव दिव्यया दृशा कल्पयित्वा योगमार्गेण दीक्षां ददाति । एषा ज्ञानवती दीक्षा पुन: षड्विधा भवति ।

**चाक्षुषी स्पर्शदीक्षा च वाचिकीमानसी तथा ।**
**शास्त्री च योगदीक्षा च हौत्रीत्यादिरनेकधा ।। (रौ-48.15)**

| | | |
|---|---|---|
| a.चाक्षुषीदीक्षा | b.स्पर्शदीक्षा | c.मन्त्रदीक्षा |
| d.मानसीदीक्षा | e.शास्त्रदीक्षा | f.योगदीक्षा च |

a.**चाक्षुषीदीक्षा** - आचार्य: शिवोऽहमिति भावनया स्वनेत्राभ्यां शिष्यं पश्यन् तस्मिन् दृशा शक्तिपातं करोति । तेन शक्ति पातेन शिष्यस्य मलपाश: अपनोदित: भवति । चक्षुषा क्रियमाणा इयं चाक्षुषी ।

b.**स्पर्शदीक्षा** - गुरु: स्व दक्षिणं हस्तं शिवहस्तं भावयित्वा शिष्यं शिष्यं शिरस: आरभ्य पादपर्यन्तं हस्तेन स्पृशति । तेन स्पर्शेन मल: अपनुद्यते । स्पर्शाधारिता इयं स्पर्शदीक्षा ।

c.**मन्त्रदीक्षा** - गुरुः मन्त्रोच्चारणेन शिष्यं शुद्धं करोति इति इयं मन्त्रदीक्षा ।

d.**मानसीदीक्षा** - गुरुः शिवोऽहं इति भावनया शिष्यं मनसि निधाय तं पापेभ्यः मोचयति मनः प्रधाना इमं दीक्षा मानसीदीज्ञा ।

e.**शास्त्रदीक्षा** - शैवशास्त्रबोधनेन शिष्यं गुरुः शिवतत्त्वम् बोधयति इति इयं शास्त्रदीक्षा ।

f.**योगदीक्षा** - मूलाधार, स्वाधिष्ठान, मणिपूरक, अनाहत, विशुद्ध, आज्ञा चक्राणि दर्शयित्वा तत् सम्बन्धं बोधयित्वा योगमार्गेण प्रदेया दीक्षा योगदीक्षा ।

**2.क्रियावतीदीक्षा - "एका क्रियावती तत्र कुण्डमण्डल पूर्विका"** लक्षणवती यागशालां निर्माय होमकुण्डं महावेदिकां उपवेदिकाश्च संस्थाप्य समस्त क्रियाणां समयविशेष – निर्वाण आचार्यास्त्राभिषेकाणां च करणेन निर्वाह्यादीक्षा – क्रियावती दीक्षा । अद्यावधि समयविशेषनिर्वाणदीक्षाणां तासामुपपभेदानामपि विवृतिः कृता । दीक्षा त्रयप्राप्तेः अनन्तरं विशेषाधिकार प्राप्तये ग्राह्या आचार्य दीक्षा अत्र निरूप्यते ।

**4.आचार्यदीक्षा-** पूर्वोक्त दीक्षा त्रयस्य प्राप्तेः अनन्तरं तन्नियमानुष्ठानपरः शिष्यः आचार्यदीक्षा ग्रहणे श्रद्धालुश्चेत् सः आचार्याभिषेक योग्यो भवति । आचार्याभिषेके अध्वशुद्धेरनन्तरं सद्योजातादि पञ्चकलशान् शंखं च पूजयित्वा तज्जलेन अभिषेकः करणीयः । सर्वाधिकार प्रदानाय उष्णीशादि राजलाञ्छनानि स्रुक स्रुवादि वैदिक मङ्गलद्रव्याणि देयानि सः आलयादि प्रतिष्ठासु नैमित्तिक क्रियासु योग्यः इति आचार्यैः अनुगृहीतो भवति । आचार्यदीक्षां प्राप्य नित्यं स्वधर्मपरः समस्तकर्माचरणपरः शिवोऽमिति भावनया सायुज्यं प्राप्नोति ।

**5.अस्त्राभिषेकः** - आचार्याभिषेकात् अनन्तरं चत्वारिंशत् दिनानि स्वधर्माचरणानन्तरं च अस्त्राभिषेकः करणीयः। प्रधान कलशे पाशुपतास्त्रं पूजयित्वा होमं विधाय समस्त विधीनां निर्वहणानन्तरं अस्त्रकलशाभिषेकः क्रियते । ततः सर्वे धर्माः निरन्तरमनुष्ठेयाः ततः शाश्वतं शिवपदं प्राप्नोति ।

इदानीं शिष्य परीक्षा कालनिर्देशः दीक्षा प्राप्तिस्थानं क्रियाचरणाय यागशाला मण्डपादि लक्षणं अनुशीलनीयम् ।

**3.दीक्षा प्रदानाय शिष्ययोग्यता परीक्षणम्** - शिष्यं संवत्सरं शोधयित्वा तस्य सामर्थ्यं निश्चित्य दीक्षा ग्रहणयोग्यं ज्ञात्वा दीक्षां गुरुः दद्यात्।

**4.दीक्षाकालनिर्णयः** - उत्तरायणे शुक्लपक्षे शुभतिथौ शुभवारे शुभनक्षत्रे विषुवे चन्द्रसूर्यग्रहणयोः अपि च शुभमासे सुमुहूर्ते सुलग्ने दीक्षा आचरणीया । आलयेषु रथोत्सव दमनोत्सवादि उत्सवकालेष्वपि दीक्षा स्वीकारः करणीयः इति शैवकालविवेक नामक ग्रन्थे स्पष्टम् ।

**5.दीक्षास्थानम् –** हिमालय–महेन्द्र–मलय–विन्ध्यादि पर्वतेषु समुद्रतीरे, गङ्गादि नदीतीरे, उद्यानेषु, यज्ञवृक्ष छायासु[1], गोशालासु, देवालयेषु, यज्ञमण्डपेषु, गुरोः निवासे वा शुभस्थाने दीक्षास्वीकारः करणीयः ।

**6.दीक्षा मण्डपलक्षणम्** - द्वादश हस्तप्रमाणेन चतुर्दश हस्तप्रमाणेन षोडश हस्तादि प्रमाणेन वा यागशालां निर्माय तन्मध्यभागे लतालिङ्गोद्भवमण्डलं, उमाकान्तमण्डलं नवनाभमण्डलं, अनन्तविजयमण्डलं, भद्रमण्डलं, पुराकारमण्डलं, लताकारलिंगमण्डलं, सुभद्र, स्वस्तिक चण्डेशपूजादि मण्डलं अर्धचन्द्राकृतिं इत्यादिषु अन्यतरस्य मण्डलस्य निर्माणं आगमोक्तदिशा करणीयम् ।

**7.दीक्षासंस्कारेषु क्रियाविशेषाः** - गुरुः योग्यं शिष्यं निश्चित्य शुभमुहूर्ते पवित्रस्थाने यागशालां स्थापयित्वा सन्ध्यावन्दनादि नित्यकर्मसमाप्तेरनन्तरं यागशालाशुद्धये वास्तुशान्तिं कुर्यात्। तदङ्गत्वेन गणपतिपूजा पुण्याहं वास्तुपूजा होमबलिपर्याग्निकरण प्रोक्षणानि करणीयानि ।

सायंकाले गणपतिपूजा पुण्याहवाचनं, मृत्संग्रहणं, अंकुरार्पणं, कौतकबन्धनं च कृत्वा विशेष सन्ध्याचरणं करणीयम् । यागशालायां इन्द्राग्निमध्ये कुम्भे सूर्यं पूजयित्वा क्रमेण द्वारपूजा: करणीया: । पश्चिम दिग्भागे नित्यद्वारपूजां कृत्वा मध्यवेदिं दक्षिणेन उत्तराभिमुख: आसीन: भूशुद्धिं, भूतशुद्धिं कृत्वा, अन्तर्मातृका, बहिर्मातृका न्यासं कृत्वा आत्मद्रव्यमन्त्रशुद्धिं कृत्वा पञ्चगण्याराधनं विधाय तेन द्रव्येण दीक्षोपयुक्त नेत्रपटं पाशसूत्रादीन् विशेष द्रष्याणि यागशालां च प्रोक्ष्येत् ।

तदनु ऐशान्यभागे शिवकुम्भपूजां, वर्धनीकलशपूजां च कृत्वा इन्द्रादि दिक्पालकान् आयुधानि पूजयेत्। वर्धनीकलशोदकं शिवकुम्भे धारापातेन पूरयन् यागशालां प्रदक्षिणीकृत्य पुन: स्वस्थाने संस्थाप्य वायव्यकुम्भे गणेशं लक्ष्मीं उत्तरेशान्यमध्ये सप्तगुरून् पूजयेत् ।

**(1.यज्ञवृक्ष: - उदुम्बर: (उदुम्बरस्तु यज्ञाङ्ग: इत्यमर:))**

**मण्डलपूजा -** वेदिमध्यस्त मण्डले संस्कार चतुष्टयं कृत्वा पीठपूजां विरचय्य परमकारणं अध्वरपतिं शिवं आवाहयेत् । पञ्चावरणदेवतानां आवाहनं तासां पूजां नीराजनं च कुर्यात्। अनन्तरं अग्निकार्यार्थं गुरो: अनुज्ञा लभ्या ।

**अग्निकार्यम् -** सलक्षण कुण्डसंस्कारं कृत्वा वागीश्वरीं वागीश्वरं च आवास गर्भादानादि संस्कारान् कृत्वा परिधि विष्टर परिस्तरणानि निक्षिप्य सुस्रु खुव संस्कारं आज्यसंस्कारं कृत्वा सम्पात होमं वक्त्रैकीकरणं, जिह्वैकीकरणं च कृत्वा अग्ने: नामकरणादि संस्कारान् विधाय अग्निसंस्कारं नाडीसन्धानं मन्त्रतर्पणं च दीपनं स्थालीपाकं च कृत्वा चरुं त्रिधा विभज्य एकं भागं आत्मनामकं घृतेन इतरभागद्वयं घृतमधुभ्यां च प्लुतं कृत्वा शिवकुम्भे शिवाग्नौ च निवेदनरूपेण देयम् ।

**शिष्यप्रवेश: -** यागशालायां पश्चिमद्वारबाह्यदेशे शिष्यमुत्तराभिमुखं कृत्वा प्रासादमन्त्रै: निरीक्षणं कृत्वा मन्त्रस्नानेन प्रोक्षणं भस्मस्नानेनताडनं विधाय पुनर्जलेन अभ्युक्ष्य दर्भाग्रै: नाभे: उपरिपर्यन्तं शुद्धिं कृत्वा दर्भमूलै: नाभे: अध: शुद्धिं कुर्यात् । यदि शिष्य: नैष्टिक: प्रथमं नाभेरध: तत: नाभे: ऊर्ध्वं शुद्धि: करणीया । वस्त्रेण नेत्रे पिधाय पुष्पै: अञ्जलिं पूरयित्वा मण्डपं परित: प्रदक्षिणं कारयित्वा दक्षिणेन वेदिं उत्तराभिमुखो भूत्वा मण्डपे पुष्पक्षेपणं करणीयम् । पुष्पाणि मण्डपे यस्मिन् विभागे पतन्ति तत: ईशानादि पञ्चदिक्षु वर्णानुसारेण द्विजादीनां शिवादि नामभि: नामकरणं करणीयम् । तत: शिवहस्तेन शिष्यं अस्त्रमन्त्रै: प्रोक्ष्य सकलीकरणं कृत्वा शिष्यमस्तके हस्तं निधाय शिर्वमन्त्रोच्चारणेन सर्वाण्यङ्गानि विलापयेत् (विलेपयेत्) । तदनु स्तण्डिले देवं पुष्पमालालङ्कृतं कारयित्वा नमस्कृत्य शिष्यं होमकुण्डस्य समीपे निवेशयेत् । यथा दर्भा: कुण्डं स्पृशन्ति तथा दर्भान् शिष्यहस्ते स्थापयित्वा दर्भाग्रान् गुरु: जंघयो: निधाय, गुरु: शिष्यहृदयप्रवेशं कुर्यात् ।

तत: कुम्भस्थण्डिलवह्निषु नाडीसन्धानार्थं मूलमन्त्रेण आहुति: त्रयं दत्वा संहिता मन्त्रै: शिष्यशिरसि सम्पातहोम: हवनीय: मूलमन्त्रतर्पणार्थं आहुतिशतं तत: ब्रह्माङ्गमन्त्रै: दशांशेन आहुती: दत्वा पूर्णाहुति: अर्पणीया।

अष्टकला प्रासादमन्त्रानुपदिश्य शिवार्चनं कारयित्वा अग्ने: अर्चनं कारयित्वा आशिषौ दत्वा पराङ्मुखार्थं प्रदाय अग्निस्थं शिवं मूर्त्या योजयित्वा भूरादि आहुती: समर्प्य ब्रह्माङ्गेभ्य: बलिहरणं कृत्वा देवान् उद्वास्य अनुष्ठेयान् विषयान् शिष्यमुपदिशेत् ।

**उपदेश: -** नित्यं शास्त्रोक्त स्नानादिकं कृत्वा स्वसूत्रोक्त प्रकारेण सन्ध्यावन्दनादि कृत्वा शैवीं सन्ध्याम् उपास्य ब्रह्मचारी चेत् भिक्षाटनं स्वाध्यायं गुरुशुश्रूषां च आचरेत् । गृहस्थ: चेत पञ्च महायज्ञादि तदाश्रमयोग्यान् धर्मान् आचरेत् । देवा: गुरव: साधका: न निन्द्या: शास्त्रेतर विषया: न सम्भाष्या: लिङ्गलंघनं आलयछायालंघनं च न करणीयं इति शिष्यमुपदिशेत् ।

शिष्योऽपि गुरूपदिष्टप्रकारेण पूजा जपहोमादि आचरन् शिवानुग्रहं प्राप्य शिवसालोक्यं प्राप्नोति ।

**विशेषदीक्षासंस्कारक्रिया -** परिसमाप्तसमयदीक्ष: शिष्य: विशेषदीक्षा प्राप्तौ अधिकारी भवति । पूर्ववत् यागशालायां देवान् पूजयित्वा अग्नौ शिवमाराध्य शिष्यं अस्त्रमन्त्रै: प्रोक्ष्य कुसुमै: ताडनं कृत्वा गुरु: शिष्यस्य दक्षिणनासिकाया: वायुमार्गेण शिष्यदेहं

प्रविशेत्। तृणाग्र बिन्दुरूपं जीवं भावयित्वा हृदये पूरकेन गृहीत्वा कुम्भकेन शिष्यं आत्मानं शिवसमौ कल्पयित्वा मूलमन्त्रं जपन् द्वादशान्तं नीत्वा भ्रूमध्यं प्रविश्य दक्षिण नाडी मुखेन निस्सारयेत् ।

मूलमन्त्रहोमं यथाशक्तिकृत्वा तत् दशांशेन ब्रह्ममन्त्रैः हुत्वा गर्भाधानादि संस्कारार्थं अङ्गमन्त्रैः प्रत्येकं पञ्चाहुतीः दत्वा शिष्यं **"त्वम् शिवोऽसि"** इति सम्बोध्य तदनु अग्नौ पूर्णाहुतिः करणीया । अनन्तरं गुरुः अग्निप्रभं शिष्यस्य आत्मानं संहारमुद्रया गृहीत्वा स्वहृदये प्रविष्टम् कृत्वा कुम्भकेन तस्यात्मनः शिवसमत्वं कल्पयित्वा द्वादशान्तं नीत्वा पुनः भ्रूमध्यं प्रवेश्य शिष्यस्य भोगायतनदेहे निधापयेत् एताः शिष्ये प्रयोज्याः क्रियाः ।

अनन्तरं यागशालायाः ईशान्यभागे स्थितयोः वागीशयोः[1], तर्पणं कृत्वा प्रायश्चित्तार्थं मूलमन्त्रेण आहुतिशतं दत्वा पूर्णाहुतिं हुत्वा शिष्यं आशिषा नियोज्य । **"शिवशास्त्रश्रवणे योग्योऽसि"** इत्युक्त्वा समयान् उपदिशेत् । पूर्वोक्त उपदेशाः इव नित्यं शिवहोमादयः आचरणीयाः । शिवनिन्दा गुरुनिन्दा च न करणीया इति शिष्यं आदिशेत् । शिवाश्रमप्रवेशाभिलषिभ्यः दण्डकौपीनभस्मोपवीतशिखामणिजटायुक्तानि वस्तूनि पवित्री कृतानि सम्पातहोमेन शुद्धानि पृथक् पात्रेषु निधाय शिवगुरुकुम्भौ स्पर्शयित्वा भगवत्प्रसादः इति शिष्याय देयानि । ततः अग्नौ शिवसन्तर्पणं कृत्वा आम्लं कटुकं च निवेदनरूपेण हुत्वा नाडीसन्धानद्वारेण कुम्भं प्रवेश्य बलिहरणादयः करणीयाः मण्डपे स्थितान् कुम्भान् अष्टपुष्पैः पूजयित्वा पराङ्मुखार्घ्यं दत्वा क्षमाप्रार्थनं कृत्वा मण्डपदेवताः उद्वास्याः। तदनु ईशान दिग्भागे अर्धचन्द्राकारमण्डले स्तण्डिलेव चण्डीश्वरं पूजयित्वा शिवनिर्माल्यम् अर्पणीयम्। एवं विशेषदीक्षां प्राप्य तन्नियमानुसारेण अन्ते सामीप्य मोक्षं प्राप्नोति ।

**निर्वाणदीक्षासंस्कारक्रिया** - गुरुः शिष्याय समयविशेषदीक्षा नियमान् दत्वा शिष्येण तत्पालनं कथं कृतमिति संवत्सरं परीक्ष्य शिवज्ञानजिज्ञासुं निश्चित्य मलपरिपाकं दृष्ट्वा तस्मै निर्वाणदीक्षां दद्यात् । पूर्ववत् यागशालायां सूर्यद्वारादि देवतार्चनं कृत्वा अग्निसंस्कारान् कृत्वा अग्नौ मूलादि अस्त्रमन्त्रैः तर्पणदीपने कृत्वा दक्षिणेन महावेदिं शिष्यं उत्तराभिमुखं उपवेश्य षडध्वशोधनं कृत्वा कन्यया निर्मितेन सूत्रेण त्रिवृत्तेन सूत्रस्य प्रोक्षणावकुण्ठन पूजादिभिः सूत्रम् अर्चयित्वा शिष्यशिखायाः अन्तिमभागे सूत्रं बध्वा मुखादुपरि पादाङ्गुष्टपर्यन्तं सूत्रं लम्बनीयम् । पुरुषाणां दक्षिणभागे स्त्रीणां वामभागे सूत्रं लम्बनीयम् । सूत्रे सुषुम्णा नाडी भावयित्वा तया सन्दधीत। शिष्यमस्तके शक्तिं पूजयित्वा सन्निधानाहुतीः दद्यात् । अस्त्रमन्त्रेण शिष्यं प्रोक्ष्य पुष्पैः ताडयित्वा हुंकारेण नासिका रन्ध्रात् वायुं रेचयन् शिष्यस्य वामनाडीद्वारेण शिष्येण पूरके क्रियमाणे शिष्यहृदयं प्रविशेत् । शिष्यं चैतन्यरूपिणं तारकाकारं हंसबीजं भावयित्वां द्वादशान्तं नीत्वा भ्रूमध्यं च नीत्वा दक्षिण नासिकायाः निस्सारयेत्। सूत्रे व्याप्तं जीवं भावयित्वा मूलमन्त्रेण आहुतित्र्यं दद्यात् । ताडनादि क्रियाः सूत्रस्यैव करणीयाः शिष्येचैतन्यं अपि सूत्रस्थं भावनीयम् ।

**शान्त्यतीतकला सन्धान** - शान्त्यतीतकलायां व्याप्तं तत्वद्वयं व्याप्तानि पञ्चदशभुवनानि षोडशवर्णानि पदमेकं मन्त्रत्रयं बीजद्वयं, नाडीद्वयं, मरुत्द्वयं, इन्द्रियद्वयं, शब्दविषयं ध्वनिगुणं पीतवर्णं कृत्तमण्डलं मोक्षावस्थां अतीतं सदाशिवकारणेश्वरं भावयित्वा पुष्पैः ताडनादिकं कृत्वा पूरकेन जीवः ग्रहणीयः । शिखायाः आरभ्य ललाटपर्यन्तं सूत्रं संयुज्य सन्निधानाहुतीः दद्यात् ।

**शान्तिकलासन्धानम्** - कला मन्त्रेण अवलोक्य तत्त्वत्रयं अष्टादश भुवनानि वर्णत्रयं एकादश पदानि मन्त्रद्वयं बीजद्वयं, नाडीद्वयं, वायुद्वयं स्पर्शविषयं, शब्दस्पर्शगुणौ, कृष्णवर्णं षस्कोणं तुरीयातीतावस्थां कारणेश्वरं शान्तिकलायां भावयित्वा ललाटादि कण्ठपर्यन्तं नारचमुद्रया ताडनं कृत्वा पूरकवृत्या जीवं संगृह्य सूत्रे नियुक्तं कृत्वा अर्चयित्वा सन्निधानाहुतिं दद्यात् ।

**विद्याकलासन्धानम्** - कला मन्त्रेण अवलोक्य सप्त तत्वानि सप्तविंशति भुवनानि, सप्त वर्णानि विंशति पदानि, मन्त्रद्वयं, बीजद्वयं, नाडीद्वयं, वायुद्वयं इन्द्रियद्वयं रूपविषयं शब्दस्पर्श रूप गुणत्रयं रक्तवर्णं त्रिकोण मण्डलं स्वस्तिक लाञ्छनं सुषुप्त्यवस्थां रुद्रं कारणेश्वररूपेण वहन्तीं विद्याकलां भावयित्वा **"विद्या कलाये हः हुम फट्"** इति मन्त्रेण पुष्पेण कण्ठात् आरभ्य नाभिपर्यन्तं ताडनं कृत्वा संहार मुद्रया संगृह्य सूत्रे योजयित्वा सन्निधानाहुतिं दद्यात् ।

**प्रतिष्ठाकला सन्धानम् - "प्रतिष्ठा कलायै नमः"** इति अवलोक्य चतुर्विंशति तत्वानि षट्पद्चाशत् भुवनानि चतुर्विंशति वर्णानि एकविंशति पदानि मन्त्रद्वयं बीजद्वयं नाडीद्वयं वायुद्वयं इन्द्रियद्वयं रसविषयं शब्दस्पर्शरूपरसगुणान् शुभ्रवर्णं अर्धचन्द्राकारमण्डलं पद्मलाञ्छितं स्वप्नावस्थं विष्णुकारणेश्वरिकां प्रतिष्ठाकलां भावयित्वा नाभेः आरभ्य जानुपर्यन्तं पुष्पैः ताडनं कृत्वा पूरकवृत्या संहारं गृहीत्वा सूत्रे योजयित्वा सन्निधानाहुतीः दद्यात् ।

**निवृत्तिकलासन्धानम् - "निवृत्तिकलायै नमः"** इत्यवलोक्य तत्वमेकं भुवनानामष्टोत्तरशतं रुद्राणां शतं, वर्णमेकं, अष्टाविंशति पदानि मन्त्रद्वयं बीजद्वयं, नाडीद्वयं वायद्वयं, इन्द्रियद्वयं, गन्धविषयं शब्दादि पञ्चगुणान्, पीतवर्णं चतुरस्रमण्डलं वज्रलाञ्छितं जाग्रदवस्थां ब्रह्मकारणेश्वरकां व्याप्तां निवृत्तिकलां जानोरथः सपुष्पताडनं कृत्वा पूरकेन संहारमुद्रया गृहीत्वा सूत्रे योजयित्वा सन्निधानाहुतीः दद्यात् । एवं पञ्चकलाः अवलोकन ताडन ग्रहण संयोजनैः अनुष्ठेयाः ।

**सबीजदीक्षा -** सबीजदीक्षायां शरीरलाभादारभ्य आनुषङ्गिकेभ्यः धर्मेभ्यः समयाचारात प्राप्तस्य पाशबन्धस्य कर्मणां च स्मृत्वा[1] सर्वं सूत्रगतं भावयेत् ।

**1. "अधीगर्थदयेषां कर्मणि (2-3-52) षष्ठी. इक् - स्मरणे इति धातुः । सदा अधिपूर्वको भवति । अधीगर्थः = स्मरणम् ।**

**निर्बीजदीक्षा -** देहारम्भक धर्मादारभ्य आनुषङ्गिक समयाचारादिकं सर्वं सूत्रगतं भावयेत् । पाशवन्ध सम्बन्धः कर्मणश्च सम्बन्धः अत्र न भवति ।

**बुभुक्षुदीक्षा -** भोक्तुमिच्छा बुभुक्षा । भोक्तुमिच्छुः बुभुक्षः । कालत्रय यापकस्य धर्माधर्मात्मिक वर्तमान शरीरस्य भोगदायकत्वं भावयित्वा सर्वधर्मात्मकं पाशसूत्र गतं भावयेत् । (सर्वधर्मान् पाशसूत्रगतान् भावयेत्)

**व्याप्यव्यापकभावना -** तत्वभुवनवर्णपदमन्त्राः व्याप्याः शान्त्यतीतादयः व्यापकाः । एवमेव कलापञ्चकेभ्यः आहुतीः दत्वा दीपनं कृत्वा ब्रह्मरन्ध्र भूमध्य कण्ठ नाभि जानुषु कलास्थानेषु कुङ्कुमं धारयित्वा तत्र शिवं साङ्गं पूजयित्वा शिरसि पुष्पेण ताडयित्वा **"शान्त्यतीतकलाये नमः"** इति प्रविश्य सूत्रे ग्रन्थिः करणीयः एवमेव ललाट कण्ठनाभिजानुप्रदेशेषु शान्ति-विद्या-प्रतिष्ठा-निवृत्तिकलास्थानेषु ग्रन्थिः स्थापनीयः । ततः दक्षिण भुजे सूत्रं निवेश्य मूलमन्त्रेण अष्टोत्तरशतं जुहुयात् सूत्रं शालायां स्तण्डिले मण्डले वा निधाय पूजां कुर्यात् । मण्डलात् बहिः मण्डलत्रयं कृत्वा प्रथममण्डले आसीनः । तत्र तत्त्वत्रय स्मरण पूर्वकं पञ्चगव्यं चुलुकोदकेन स्वीकार्यम्। द्वितीयमण्डले चरुं प्रोक्ष्य पञ्चाङ्गलिभिः दन्तस्पर्शेन विना स्वीकार्यः । तृतीयमण्डले दन्तशोधनं कृत्वा दन्तकाष्टौ विसर्जयेत् सकाष्टः कस्यां दिशिपतितः, इति ज्ञेयः मुखं प्रक्षाल्य आचम्य अन्तः प्रविश्च दक्षिणेन दन्तकाष्टं दोषनिवृत्तये अस्त्रमन्त्रेण अष्टोत्तरशतं हुत्वा मनोवाक्कायकर्मभ्य सम्भूतस्य दोषस्य निवृत्तये अघोरमन्त्रेण अष्टोत्तरशतं हुत्वा मन्त्रतर्पणं कृत्वा पूर्णाहुतिः देया । चरुशेषं निवेद्य जपसमाप्तिः करणीया । भुक्तिकामः यागमण्डपे शुद्धायां भूम्यां प्राक शिरस्कः दर्भेषु शयीत । मुमुक्षुः दक्षिण शिरस्कः शयीत । शिष्यं परितः तिलसर्षपभस्मानि बलयत्रयरूपेण क्षेपणीयानि गुरुरपि चरुं पञ्चगव्यं च प्राश्य शिष्यः इव शयितो भवेत्। अन्येद्युः प्रातः उत्थाय स्नात्वा सन्ध्यादि कर्माणि अनुष्ठाय शिष्यमाहूय रात्रौ को वा स्वप्नः दृष्टः इति पृच्छेत् । दुस्स्वप्नदर्शने शान्तिः करणीया पुनः मण्डपं प्रवश्यि सूर्यपूजादिकं आत्मपूजा पर्यन्तं कृत्वा अध्वन्यासं कृत्वा वास्तुदेवं महालक्ष्मीं इन्द्रादीन् गणपतिं गुरुं पूजयित्वा आत्मार्थं पूजां कृत्वा मण्डले परमेश्वरं कुण्डगतं शिवं पूजयित्वा पूर्णाहुतिं दत्वा दुस्स्वप्नशान्तिं कृत्वा मन्त्रतर्पणं दीपनं च कुर्यात् । पूर्वस्मिन् दिने इव वामनाडीद्वारेण शिष्ये प्रविश्य सम्पातहोमं कृत्वा वेदिस्थं सूत्रं आदाय शिष्यशिखायां पूर्ववत् लम्बितं कुर्यात् । एष पशुः (जीवः) अनुग्राह्यः इति परमात्मानं प्रार्थयेत् । आत्मदेहवह्निमण्डलकुम्भेषु शिष्ये च शोधनं कृत्वा अन्योन्यसन्धानाय मूलमन्त्रेण शतं जुहुयात् ।

**निवृत्तिकला शुद्धिः -** जीवस्य मलकर्म मायारूप भोक्तृत्व भोगशरीरादिकारणं भावयेत् । ब्रह्म आवाह्य पूजयित्वा जीवो अनुग्राह्यः इति प्रार्थयित्वा शिष्यं सर्वयोनिषु जातं भावयित्वा ताडनप्रोक्षणसंग्रहणादि कृत्वा मूलमन्त्रेण कमर्जिनं भावयित्वा शतं हुत्वा भोगान्

पुन: आहुतिशतेन हुत्वा चत्वारिंशत् संस्कारान् उद्दिश्य आहुतित्रयं, माया कर्मारम्भशुद्धये आहुतिशतं, माया पाशमोचनार्थं पाशुपतेन होमं मलपाशनिवृत्तये मूलमन्त्रेण आहुति शतं जुहुयात् । तत: कर्तरीं गृहीत्वा सप्तकृत्व: अस्त्रमन्त्रं जप्त्वा निवृत्तिकलापाशं छिद्यात् सूत्राणि वर्तुलानि कृत्वा स्रुवे निक्षिप्य निवृत्तिकला मन्त्रेण अग्निदग्धानि कुर्यात् । । प्रायश्चित्तार्थं अस्त्रमन्त्रेण अष्टौ आहुती: दद्यात् । सबीजदीक्षा चेत् ब्रह्म अग्नौ आवाह्य आहुतित्रयं दत्वा उद्वासयेत् । निवृत्तिकला पाशात् शिष्यं उद्धर इति सम्प्रार्थ्य अग्ने: संहारमुद्रया आत्मानं वामनासिकया गृहीत्वा शुद्धमात्मानं हृदयगतं भावयित्वा द्वादशान्तं नीत्वा रेचकेन शिष्ये प्रवेशयेत्। मूलमन्त्रेण जलविन्दून् शिरसि प्रोक्ष्य स्थिरीकरणार्थं मूलमन्त्रेण आहुतीं दत्वा पूर्णाहुतिं दद्यात् । एवमेव प्रतिष्ठा विद्या शान्त्यतीतकलाशुद्धी: तैस्तै: मन्त्रे: शोधयित्वा शुद्धजीवं भावयेत् ।

**शिखा छेदनम् -** शान्त्यतीतकलाशक्तिं शिवतत्वं संपूज्य अष्टोत्तरशतं मूलमन्त्रेण जुहुयात् । गुरु: शिखाग्रे ध्वान्तातीतं शक्तें चैतन्यरूपां भावयित्वा द्वादशाङ्गुलिभागादध: अष्टाङ्गुलिभ्य: ऊर्ध्वं शिखा छित्वा घृतेन आप्लुत्य गोमये स्थापयित्वा घृतपूर्ण स्रुचि शिखा मन्त्रेण कुण्डे दग्धां कुर्यात् । तत: शिष्य: स्नात्वा स्रुक् स्रुवादीन्। शोधयित्वा शिवपूजां कुर्यात् । गुरुरपि आचम्य भस्म दृत्वा शालां प्रविशेत् ।

**शिष्यसंयोग: -** शिष्यं प्रोक्ष्य सकलीकरणं आचरितं कृत्वा नाडीसन्धानं कृत्वा अनुसन्धानहोमं कुर्यात् । शिष्यस्थ शिवतत्त्व व्यक्त्ये अष्टोत्तरशतं मूलमन्त्रेण हुत्वा शिवे संयोजयेत् । तत: पूरकेन शिष्यदेहं प्रविश्य द्वादशान्तं नीत्वा जीवं संगृह्य हृदये निधाय शिष्येण आज्यधारां त्याजयेत् । सा च धारा शिष्यचैतन्यरूपा शिष्येण भाव्या । तत: द्वादशान्ते नित्यगुणोदय शिवे शिष्य: संयोज्य: । तत: आसीन: आहुतित्रयं दद्यात् । **सर्वज्ञो भव, अनादिबोधा भव, अनन्तशक्तिर्भव(स्व)** इति तान तान गुणान् शिष्यस्थान् भावयेत् । तत: सूर्यसदृशमात्मानं संहारमुद्रया हृदये गृहीत्वा शिष्य हृदये देहारम्भ कर्मफलभोगाय योजयित्वा । शक्तिपातजन्य श्रमापनोदनाय अर्घ्यजलबिन्दून् शिरसि प्रोक्षयेत् । स्वदक्षिणदिग्भागे तथैव मण्डले दक्षिणभागे शिष्यमुपवेश्य आशिषा योजयेत् तर्पणाद्यनन्तरं प्रायश्चित्तार्थं अष्टोत्तरशतं मूलमन्त्रेण अन्तर्बलि बहिर्बलि प्रभृति बलिजातं विधाय कुण्डगतं शिवं कुम्भे संयोजयेत् । अर्धचन्द्राकारमण्डले चण्डनाथं पूजयित्वा निर्माल्यं निवेदयेत् । शालायां देवतानाम् उद्वासनं करणीयम् । तत: शिष्यं निर्माल्य लङ्घनादि अकरणीय कार्यनिवृत्तम् कर्तुं आचारान् बोधयित्वा आर्जवादि सद्गुणान् बोधयेत् । शिष्यं स्वस्तिकाकारमण्डले उपवेश्य वर्धनी शिवकुम्भ कलशजलै: अभिशेचयेत् । शिष्य: गुरुं पूजयित्वा तस्मै यथाशक्तिं दक्षिणां दद्यात् ।

**आचार्याभिषेक संस्कार क्रिया -** पूर्वोक्त समयादिदीक्षा: गुरो: प्राप्य शिष्य: आचार्याभिषेकं कुर्यात् । स्नानादि कृत्वा फलशुद्धी: आचर्य मण्डलस्थ शिवपूजां होमाग्नौ शिवार्चनं कृत्वा जुहुयात् । गुरु: शिष्यस्य अध्वशुद्धिं कृत्वा यागशालाया: ईशान्यभागे चतुर्दिक्षु पञ्चकलशान स्थापयित्वा पूजयित्वा तत्फलं समर्पितं कुर्यात्। यागशालाया: ईशान्यभागे वेदिकायां स्वस्तिकमण्डले प्राङ्मुखं उदङ्मुखं वा शिष्यमुपवेश्य सकलीकरणं कृत्वा मृदादिभि: शुद्धिं कृत्वा गुरु: शिष्यस्य सुषम्णा मार्गेण शिवं आविष्टं कृत्वा सुमुहूर्ते सद्यादि पञ्चकलशान् अभिषिक्तान् कुर्यात् तत: नूतन वस्त्रधारणं कृत्वा शिष्यदक्षिणहस्तं गृहीत्वा यज्ञशालां प्रविश्य दक्षिणेन वेदिम् उपविष्टं कुर्यात् । शिवपीठात् बहि: दक्षिणभागे प्रणवासने शंखमेकं निधाय शिवपूजा अनन्तरं शिष्य: अभिषेच्य: । सर्वाधिकार सिद्धये शिवहस्तं मूर्धनि (मूर्ध्नि) निधाय उष्णीशादि राजलाञ्छनानि, कर्तरी घुटिकादि आचारलाञ्छनानि दध्यात् । इत: प्रभृति दीक्षा प्रतिष्ठादि विषयज्ञ: नैमित्तिकादि कर्माचरणे योग्योऽसि इति शिष्यम् आदिशेत् । शिष्योऽपि गुरो: आज्ञां स्वीकुर्यात् तत: प्रभृति कस्मै अपि नमस्कार: शिष्येण न करणीय:। तत: शिवम् अभिवाद्य गुरु: शिष्यं अग्निसन्निधिं प्रापय्य संहिता मन्त्रान् प्रत्येकं पञ्चकृत्व:, कला पञ्चकेभ्य: प्रत्येकं पञ्चहुतिं दत्वा पूर्णाहुतीं दत्वा शिष्यं योजयित्वा तस्य हस्तेन शिवाग्निं पूजितं कुर्यात् ।

**आदेशा**: - नित्यपूजा होम ध्यानादय: सदा कार्या: । शिवज्ञानं सम्पूर्णतया ज्ञेयम् । जिज्ञासव: अध्यापनीया:। संवत्सरं शिष्यं परीक्ष्यैव दीक्षां दद्यात् इति गुरु: शिष्यमादिशेत् । तत: प्रायश्चित्तहोमान् कुर्यात् आचार्याभिषेकं प्राप्य शिष्य: पञ्चचत्वारिंशत् दिनानि जितेन्द्रिय: त्रिकालस्नायी, नक्तभोजी, भूशायी भवेत् । प्रत्यहं आत्मार्थपूजां सहस्रं जपं तत् दशांशं ब्रह्माङ्गं जप्त्वा अग्नौ दशांशहोमं कुर्यात् । आदावन्ते च पञ्चगव्य प्राशनं कार्यम् ।

**अस्त्राभिषेकक्रिया** - आचार्यदीक्षा समाप्ते: अनन्तरं चत्वारिंशत् दिनान् नियमान् पालयित्वा शिष्य: गुरुणा अस्त्राभिषेकेण अभिषेचनीय: । गुरु: पूर्ववत् सकलीकरणादि कृत्वा मण्डले षड् उत्थासनं कल्पयित्वा कलशे पाशुपतास्त्रं आवाह्य सावरण जपान्तं पूजयित्वा अग्नौ शिवमर्चयित्वा मधुत्रयेण अस्त्रराजमन्त्रेण अष्टोत्तरशतं जुहुयात् अङ्गेभ्य तद् दशांशेन होम: करणीय: । कलशजलेन शिष्य: अभिषेच्य: । शिष्य: यागविसर्जनं कृत्वा गुरुं पूजयेत्।

**शक्तिपातलक्षणम्** - शिष्याय दीक्षा प्रदानकाले जायन्ते । स्पर्शादि दीक्षा मार्गेण शक्तिपात: जायते । तदा शिष्ये कम्पानन्दादय: शक्तिपातेन मलपाशादि निवृत्ति: भवति । आत्मशुद्धि: जायते शिवोऽहमिति भावनया **शिष्योऽपि** दीक्षाप्रदाने अधिकारी भवति । जपहोमादि कर्मभि: शिवत्व, प्राप्तिरपि भवति ।

**8 .दीक्षाफलम्** - दीक्षा चतुष्टय स्वीकारेण सालोक्यादि चतुविध मोक्षप्राप्ति: जन्मराहित्यं शाश्वत शिवपदं प्राप्नोति। शैवागमेषु न केवलं आलयनिर्माणादि किन्तु मोक्षप्राप्तये सुलभा: उपाया: अपि निरूपिता:।

**उपसंहार**: – एतावत्पर्यन्तं महेश्वर पञ्चमुखेभ्य: उद्गतेभ्य: सिद्धान्तभूत शैवागमेभ्य: क्रियाचर्यापादान्तर्गत दीक्षाविधिपटलस्थान् विषयान् गृहीत्वा पद्धतिकारेन्न अघोरशिवाचार्येण निर्दिष्टा: दीक्षाविधय: विवृता: । तेष्वपि समयविशेष निर्वाणदीक्षा: तथा आचार्य अस्त्राभिषेक ग्रहणविधि: दीक्षाकाले दीक्षाभेद स्वीकारं अनुसृत्य करणीयानं यागशाला कुण्डमण्डप पूजादि क्रतु विशेषाणां विस्तारोपि निरूपित: । आचार्येण दीक्षिताय क्रियमाण: षडध्वशोधनविधि:, तद्विधे: अनुष्ठानेन दीक्षितेन प्राप्यमनुभव:, दीक्षाभेदै:, संस्कारभेदैश्च क्रियमाणा: योग्यता भेदा: विवृता: । एवमेव दीक्षितेन अनुष्ठेया: नित्यपूजा प्रकारा: विस्तरेण व्याख्याता: । शिवो2हम् इति भावनया क्रियमाणानां कर्मणां फलस्य शिवार्पणेन जीवस्य सालोक्य, सामीप्य, सारूप्य, सायुज्य रूपा: मोक्षप्रकारा: अपि सिध्यन्ति इति शैवागम सिद्धान्त: । अद्यापि अनुष्ठीयमान: एवं निध: आचार: शैवै:अनुष्ठियन्ते दीक्षिता: अर्चका: नित्यं आत्मार्थ परार्थ यजनपरा: तथा भक्ता: च स्वार्थयाजका: आत्मोद्धरणाय यतेयुरिति आशंसा ।

**उपयुक्तग्रन्थसूचि**


1. अचिंत्यविश्वसादाख्यागम: दीक्षाविधि: 38 पटल:
2. (Edit by –C.H.Pavan Vamsi Sri, Ph.d Theeses, S.V.Vedic University, Tirupati–2021)
3. अजितागम:, तृतीय भाग: दीक्षाविधि: 80 पटल:
4. (संपादक: एन् आर् भट्, Instutute Francais De Pandichery – 1991)
5. कारणागम:, पूर्व भाग: शिवदीक्षाविधि: 145 पटल:
6. (संपादक:–मुल्लपूडि सीतारामशास्त्री, मुद्रणम् – श्रीवेङ्कटेश्वरवेदविश्वविद्यालयं, तिरुपति, 2009)
7. कामिकागम:, उत्तर भाग: निर्वाणदीक्षाविधि: 23 पटल:
8. (दक्षणभारत अर्चकसंघ संचालकै:, श्री.चे. स्वामिनाथ शिवाचार्यै: प्रकाशित: । दक्षिणभारत अर्चकसंघ:(रिजिष्टर्ड् 39–1950) 24 बद्रय्यन् वीथी, मद्रास्, 1988)
9. कामिकागम:,उत्तर भाग: आचार्याभिषेकविधि: 24 पटल:

10. (दक्षणभारत अर्चकसंघ संचालकैः, श्री.चे. स्वामिनाथ शिवाचार्यैः प्रकाशितः । दक्षिणभारत अर्चकसंघः(रिजिष्टर्ड् 39-1950) 24 बद्रय्यन् वीथी, मद्रास्, 1988)
11. किरणागमः क्रियापादः दीक्षाविधिः 10,15 पटलौ
12. (संपादकः - तत्पुरुषपंचापकेश शिवाचार्यः, तिरुवय्यारु क्षेत्रं, प्रकाशकः- शिवागम सिद्धान्तपरिपालना संघम्, देवकोट्टै-1932)
13. मतंगपारमेश्वरागमः क्रियापादः दीक्षाविधिः 7,8,9,10 पटलाः
14. (Edit by -N.R. Bhatt, Published by- Instutute Francais De Pandichery - 1982)
15. मृगेंद्रागमः क्रियापादः दीक्षाविधिः 8 पटलः
16. (Edit by -N.R. Bhatt, Published by- Instutute Francais De Pandichery - 1962)

**पद्धति ग्रन्थाः**

17. अघोरशिवाचार्यपद्धतिः दीक्षाविधिः
18. (Edit by -Gnanasambandha Parasakthi Swami, Published by- Gnanasambanda Mudhrakshara Sala, Chidambaram, 1927)
19. ईशानगुरुदेवपद्धतिःदीक्षाविधिः
20. (Edit by -T. Ganapathi Sastri, Published by- T. Ganapathi Sastri, 1920)
21. सोमशंभुवद्धतिः दीक्षाविधिः
22. (Edit by -Helene Grunnek -Lachaux, Published by - by Instutute Francais De Pandichery - 1977)